**तरवालिका** स्त्री करपालिका+पृषो० । खड्गभेदे हेमच० ।

**तरम्बुज** न० मध्यजलके फलभेदे कालिङ्गशब्दे २९७ पृ० तद्गुणादि दृश्यम् ।
"ज्यैष्ठे मासि महेशानि ! पौर्णमास्यां निशार्द्धके । तृष्णातुरा महाकाली भ्रमन्ती पितृकानने । तज्ज्ञात्वा ब्रह्मणा तस्यै फलं दत्तं तरम्बुजम् । तत्फलभक्षणात् तृप्ता वरदापि हरप्रिया । यो मे दद्यात् फलं रम्यं स चिरायुस्तुर्युगम्" । उत्तरकामाख्यातन्त्रम् ।

**तरल** पु० तॄ—अलच् । १हारमध्यस्थे मणौ, अमरः २हारे, ३तले मेदि० । ४चपले, ५कामुके, ६विस्तीर्णे, ७भास्वरे, ८मध्यशून्ये-द्रव्ये, ९द्रवीभूते पदार्थे च त्रि० हेमच० । १२हीरके रत्ने १०यवाग्वाम्, ११सुरायाञ्च स्त्री धरणिः तत्र भास्वरे "तारावितानतरला इव यामवत्यः" किरा० "व्याधानुसार्य्यमाणतरलतारास्तगा" काद० । "उत्कण्ठितासि ! तरले" सा० द० । "तारापतिस्तरलविद्युदिवाभ्रवृन्दम्" रघुः । "वैरायितारस्तरलाः" माघः । हारमध्यमणौ "प्रवालमुक्तास्तरलाश्च हाराः" भा० क० ९४अ० १४ अ० । "हारांस्तरलविद्धांश्च सूर्य्यभासा विभूषिताः" हरिवं० १५२ अ० । भृशा० अभूततद्भावे क्यङ् । तरलायते "तथापि तरलायते चेतः" उद्भटः ।

**तरललोचना** स्त्री तरलं चञ्चलं लोचनं यस्याः । चञ्चलनयनायां स्त्रियां हेमच० २चञ्चलनेत्रयुक्तमात्रे त्रि० कर्म० । ३चञ्चले नेत्रे न० ।

**तरलित** त्रि० तरल इवाचरति तरलं करोति तरल+क्विप्-णिच् वा क्त । १आन्दोलिते, २कम्पिते, ३धूते, ४लुलिते च हेम० ।

**तरवारि** पु० तरं शत्रूणां गतिं वारयति वृ-णिच्-इन् । खड्गभेदे । (तरवार) इति भाषा । हेमच० असिशब्दे ५५१पृ० तल्लक्षणादिकमुक्तं युक्तिकल्पतरौ तत्र विशेष उक्तो यथा "अङ्गं रूपं तथा जातिर्नेत्रारिष्टे च भूमिका । ध्वनिर्मानमिति प्रोक्तं खड्गज्ञानाष्टकं शुभम् । अभिन्ने दृश्यते यादृक् विभिन्ने घटिते तथा । यदेव दृश्यते चिह्नं तदङ्गं संप्रचक्षते । नीलकृष्णादिकं खड्गे रूपमित्यभिधीयते । तेनैव यत् प्रतीतं स्यात् तज्जातिरिति गद्यते । अङ्गातिरिक्तं यज्जातिस्तन्माहात्म्योपसूचकम् । तन्नेत्रमिति जानीयात् खड्गे खड्गविशारदाः । अङ्गातिरिक्तं खड्गादि यच्छुभत्वोपसूचकम् । तदरिष्टमिति प्राहुर्भूमिरङ्गादिधारणम् । यः खड्गे जायते शब्दो दण्डदन्तादिना हते । स ध्वनिस्तुलना मानं ज्ञानमष्टविधन्त्विदम् । पञ्चाद्या निपुणैः खड्गे सम्भाव्यन्तेऽपि कृत्रिमाः । अन्त्यावकृत्रिमौ ज्ञेयौ तावेव सहजाविति । शतमङ्गानि चत्वारि रूपाणि जातयस्तथा । त्रिंशन्नेत्राणि जानीयादरिष्टानां तथैव च । भूमिश्च द्विविधा ज्ञेया ध्वनिरष्टविधो मतः । मानन्तु द्विविधं प्रोक्तमित्येषां संग्रहो मतः" । खड्गस्य शताङ्गनामानि लौहार्णवे "रूप्यस्वर्णगजोरुकूटदमनस्यूलाङ्गकृष्णारुणश्वेताम्भोजगदातिलानलकणाग्रन्थिस्थिरातैत्तिराः । मालाजीवकषट्पदोर्द्ध्वमरिचव्यालाश्वत्रिहांशनक्षौद्रक्षुद्रकमक्षिकातुषयवव्रीहिक्षुमासर्षपाः । सिंहीतण्डुलगोसिराशिवनखग्राहाक्षिकेशोपलद्रोणीकाककपालपत्रतुवरीविम्बीफलीसर्षपाः । नीलीरक्तवचारसोनसुमनाजिह्वीशमीरोहितप्रोष्ठीमारिषभार्गवीक्षुरतडिन्मेघाद्रिगुञ्जाशराः । दूर्व्वाविल्वमस्हरटुशटुकशठीमार्ज्जारिकाकेतकीमूर्व्वावज्रकलायचम्पकबलाम्यग्रोधवंशासनाः । ज्योष्ठीजालपीपिलिकानखरजःकुष्माण्डरोमस्नुहीककर्कन्धूवकुलारनालमहिषस्वच्छर्जुवक्रा इति । प्रोक्ता लौहविशारदेन मुनिना खड्गस्य भेदाः क्रमात्" । तस्य चत्वारि रूपाणि । "नीलः कृष्णश्च पिङ्गश्च धूम्रश्चेति चतुर्विधः । वर्णप्रकर्षः खड्गानां कथितो मुनिपुङ्गवैः" । चतस्रो जातयः । "ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्चेति चतुर्विधः । जातिभेदे विनिर्दिष्टः खड्गानां मुनिपुङ्गवैः" । त्रिंशन्नेत्राणि । "चक्रं पद्मं गदा शङ्खो डमरुर्द्धनुरङ्कुशः । छत्रं पताका वीणा च मत्स्यलिङ्गध्वजेन्दवः । कुम्भः शूलश्च शार्द्दूलः सिंहः सिंहासनं गजः । हंसो मयूरो जिह्वा च दशनः खड्ग एव च । पुत्रिका चामरं शैलः पुष्पमाला भुजङ्गमः । त्रिंशदेतानि नेत्राणां खड्गानां कथितानि वै" । त्रिंशदरिष्टानि "छिद्रं काकपदं रेखाभिन्नं भेकश्च मूषिकः । विडालः शर्करा नीली मशको भृङ्गसूचिके । त्रिविन्दुः कालिका दारी कपोतः काक एव च । खर्परः शकली क्रोड़ी कुशपत्रकजालिके । करालकङ्कखर्जूरघण्टाङ्गपुच्छखनित्रकम् । लाङ्गूलं वड़िशाख्यञ्च मुनिना तत्त्ववेदिना । प्रोक्तान्येतान्यरिष्टानि खड्गानां त्रिंशदेव हि" । द्विविधा भूमिः "दिव्यभौमविभागेन भूमिस्तु द्विविधा भवेत्" । अष्टधा ध्वनिः । "हंसकांस्याभ्रढक्कानां काकतन्त्रीखराश्मनाम् । ध्वनयोऽष्टविधाः प्रोक्ता नागार्जुन